# ॥ શ્રીવેઙ્કટેશાષ્ટકમ્ ૨ ॥

## .. ShrI Venkateshashtakam 2 ..

sanskritdocuments.org

September 11, 2017

# .. ShrI Venkateshashtakam 2 ..

# ॥ શ્રીવેઙ્કટેશાષ્ટકમ્ ૨ ॥

## Sanskrit Document Information

Text title : veNkateshAShTakaM 2

File name : venkaTeshAShTaka2.itx

Category : aShTaka, vishhnu, venkateshwara

Location : doc_vishhnu

Author : vaTTepalle narakaNThIrava shAstri

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com, Avinash Sathaye

Latest update : August 8, 2012

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

ૐતત્સદિતિ નિર્દેશ્યં જગજ્જન્માદિકારણમ્ ।
અનન્તકલ્યાણગુણં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૧॥

નતામરશિરોરત્ન શ્રીયુતમ્ શ્રીપદામ્બુજમ્ ।
પ્રાવૃષેણ્યઘનશ્યામં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૨॥

મોહાદિષડરિવ્યૂહગ્રહાકુલમહાર્ણવે ।
મજ્જતાં તરણીં નૃણાં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૩॥

નાથં ત્રિજગતાં એકં સાધુરક્ષણદીક્ષિતમ્ ।
શ્રીશેષશૈલમધ્યસ્થં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૪॥

રાજદ્રાજીવપત્રશ્રીમદમોચનલોચનમ્ ।
મન્દહાસલસદ્ વક્ત્રં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૫॥

યન્મુખેન્દુસ્મિતજ્યોત્સ્ના ભૂયસીં તમસાં તતિમ્ ।
વિધુનોતિ પ્રપન્નાનાં વન્દે શ્રીવેઙ્કટેશ્વરમ્॥ ૬॥

નાન્તસ્ય કસ્યચિદ્ વાક્યં શબ્દસ્યાનન્ય વાચિનઃ ।
બ્રહ્મારુદ્રેન્દ્રજનકં વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૭॥

યદ્વક્ષઃસ્થલમધ્યાસ્ય ભાતિ શ્રીરનપાયિની ।
તડિલ્લેખેવાભ્રમધ્યે વન્દે શ્રીવેઙ્કટેશ્વરમ્ ॥ ૮॥

વેઙ્કટેશાષ્ટકમિદં નરકણ્ઠીરવોદિતમ્ ।
યઃ પઠેત્ સતતં ભક્ત્યા તસ્મૈ વિષ્ણુઃ પ્રસીદતિ ॥

॥ ઇતિ શ્રી વટ્ટેપલ્લે નરકણ્ઠીરવ શાસ્ત્રિ વિરચિતમ્
શ્રી વેઙ્કટેશાષ્ટકં સમાપ્તમ્ ॥

From the book 'Tirupati Sri Venkatesvara' by Sri Sadhu Subrahmanya Sastry at pages 371 and 372

---

Encoded and Proofread by YV Malleswara Rao malleswararaoy at yahoo.com
Proofread by Avinash Sathaye

.. ShrI Venkateshashtakam 2 ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*